## पर्याय–शैक्षणिककार्ययोजना –2021–22

**नवमीकक्ष्या (IX Standard)** **ओक्टोबर्मासः (October)**

| क्रम सङ्ख्या | मासः / सप्ताहः Month / week | अधिगमफलानि Learning out come | निर्देशात्मक क्रियाकलापाः Activity | मौल्यमापन– क्रियाकलापाः Evaluation activity |
|---|---|---|---|---|
| 1 | **ओक्टोबर्मासः (October)** –2021 | | | |
| | **प्रथमसप्ताहः (1st week)** क्रियाकलापः–1 | **परोपकारः पुण्याय – गद्यम्** ❖ पाठस्य पठनम् । ❖ द्वात्रिंशत् पुत्थलिकाग्रन्थस्य परिचयः। ❖ परोपकारस्य वर्णनम् । | ➢ द्वात्रिंशत् पुत्थलिकायाः प्राक् कथनम् । ➢ नीतिकाथाद्वारा मौल्यानां परिचयः। | ▪ स्पष्टतया पाठस्य पठनम्। ▪ पर्यायपदस्य चयनम् । ▪ विक्रमराजस्य विषये अन्यान्यकथानां पठनम् । |
| | क्रियाकलापः–2 | ❖ विक्रमस्य गुणवैशिष्ट्यस्य विवरणम् । ❖ अहङ्कारस्य परिणामः ❖ तपसः प्रयोजनम् । | ➢ नदीनां प्रवाहगाम्भीर्यम् तथा परिणामः । ➢ विक्रमस्य तारणशक्तिविषये चर्चा । ➢ कन्नडभाषायाः कथासाहित्य–विषयावगमनम् । ➢ ब्रह्मराक्षसत्वं कथं सम्पद्यतेति अवबोधनम् । | ▪ तत्त्वज्ञानविषयक–कथावाचनम् । ▪ परोपकारविषये लघुलेखनम् । |
| | क्रियाकलापः–3 | ❖ प्रत्युपकारः कर्तव्यः। ❖ धर्मसङ्ग्रहः कथं कर्तव्यः इति आख्यानम् । | ➢ धर्मसङ्ग्रहस्य महत्त्वस्य श्रावणम् । ➢ दुष्कार्यस्य दुष्परिणामविषये ज्ञानप्रदानम् । ➢ कथानां परिचयः । | ▪ तत्त्वज्ञानविषयक–कथावाचनम् । |
| | **द्वितीयसप्ताहः (2nd week)** क्रियाकलापः–1 | ❖ सन्धिः – व्याकरणपाठः । ❖ सन्धीनां परिचयः । ❖ स्वरसन्धिज्ञानप्रदानम्। ❖ हल् सन्धीनां सामान्यपरिचयः । | ➢ स्वरसन्धीनां पुनरवलोकनम् । ➢ हल्–अच् प्रत्याहाराणां पुनः अवलोकनम् । | ▪ सन्धिं विभज्य नाम लिखत – मुरारिः, वनौषधिः, यद्यपि, तापि । |
| | क्रियाकलापः–2 | ❖ जश्त्वसन्धेः अवबोधनम् । ❖ श्चुत्वसन्धेः बोधनम् । | ➢ उदाहरणम् उक्त्वा सन्धिनियम–संरचनम् । ➢ विविधोदाहरणानि दत्त्वा | ▪ षडाननः, वाङ्मयः, तच्च इत्यादिपदानां सन्धिं विभज्य नाम |

| | | | | |
|---|---|---|---|---|
| | | ❖ अनुनासिकसन्धेः परिचयः ।<br>❖ संयोजन–वियोजनाभ्यां सह सन्धिप्रत्यभिज्ञानम् । | सन्धियोजन–विभागं च कर्तुं प्रेरणम् । | लेखनं नियमलेखनं च । |
| | क्रियाकलापः–3 | ❖ अनुस्वार–परसवर्णसन्धीनां स्पष्टावगमनम् । | ➢ उदाहरणम् उक्त्वा सन्धिनियमस्–संरचनम् ।<br>➢ अनुस्वार–परसवर्णसन्धीनाम् उदाहरणं दत्त्वा अभ्यासं कर्तुं प्रेरणम् । | ▪ गुरुं वन्दे, कम्पितः इत्यादि पदानां सनियमं सन्धिविभजनं कुरुत । |
| | **तृतीयसप्ताहः (3rd week)**<br>क्रियाकलापः–1 | विस्मृतभेदाः सन्तः – पद्यम्।<br>❖ भावैक्यप्रतिपादनम् ।<br>❖ मौल्यानां प्रतिपादनम् । | ➢ सुस्वरं पद्यगायनम् ।<br>➢ "सर्वे सुखिनः सन्तु, तदर्थं भेदभावः मास्तु" इति विषये कथां सङ्ग्रह्य पाठनम् । | ▪ मधुरतया गायनम् ।<br>▪ अनलः, सलिलम्, सुवर्णपुष्पम् इत्यादिपदानां तात्पर्यलेखनम् । |
| | क्रियाकलापः–2 | ❖ अलङ्कारः ।<br>❖ शब्दालङ्कारः– काव्यशोभकरान् धर्मान् अलङ्कारान् प्रचक्षते।<br>❖ अलङ्कारस्य वैशिष्ट्यज्ञानम् । | ➢ अलङ्कारस्य परिचायनम् ।<br>➢ शब्दालङ्कारस्य प्रभेदवर्णनम् ।<br>➢ महत्त्वज्ञानम् । | ▪ अनुप्रास–यमकयुक्तश्लोकानां चयनं कुरुत । |
| | क्रियाकलापः–3 | ❖ प्रबन्धः – व्याकरणम्।<br>❖ प्रकृष्टः बन्धः – प्रबन्धः ।<br>❖ विषयप्रस्तावः<br>❖ विषयनिरूपणम्<br>❖ उपसंहारः | ➢ स्वातन्त्र्योत्सवः इत्यस्मिन् विषये प्रस्ताव–निरूपणम्।<br>➢ दूरदर्शनस्य विषये ज्ञानप्रदानम् ।<br>➢ गृहे पालकानां वर्तनं इतरसदस्येषु कथं परिणमतेति वर्तालापः । | ▪ विभिन्नेषु विषयेषु प्रबन्ध –लेखनम् । |

**अभ्यासपत्रिका –1. परोपकारः पुण्याय, सन्धिः ।**

**सूक्तोत्तरचयनप्रश्नाः –**

1. नद्याः महापूरणे एतस्य कुटुम्बः हाहाकारं कुर्वन् असीत् ।

A. ब्राह्मणस्य B. महाराजस्य C. नाविकस्य D. विक्रमस्य

2. एषः ब्राह्मणस्य कुटुम्बं प्रवाहात् रक्षितवान् ।

A. नाविकः B. विक्रमः C. ब्रह्मराक्षसः D. देवः

3. मनुष्यः अनया द्वितीयं जन्म प्राप्नोति ।

A. नद्या  B. विक्रमेण  C. जनन्या  D. गायत्र्या

4. 'सैषा' अत्र अयं सन्धिः भवति ।

A) यण्  B) वृद्धिः  C) गुणः  D) यान्तादेशः

5. 'सच्चित्' अत्र अयं सन्धिः ।

A. जश्त्वः  B.अनुनासिकः  C. अनुस्वारः  D. श्चुत्वः

6. अत्र जश्त्वसन्धेः उदाहरणम् ।

A. सुरारी  B. गजेन्द्रः  C. मन्त्रः  D. जगदीशः

7. 'गौरीशः' सन्धिविभजनम् एवम् भवति ।

A. गौरी +ईशः  B. गौर +ईशः  C.गौ+ रीशः  D. गौ +ईशः

8. 'यदि + अपि' अत्र सन्धिरूपम् भवति ।

A. यदिपि  B. यद्यापि  C. यद्यपि  D. यद्येपि

9. 'तत् + मात्रम्' अस्य रूपम् भवति ।

A. तत्मात्रम्  B. तं मात्रम्  C.तन् मात्रम्  D. तन्मात्रम्

10. रमेशः– गुणसन्धिः :: मुरारिः – ------ अत्र चतुर्थपदं भवति ।

A. गुणः  B. सवर्णदीर्घः  C. वृद्धिः  D. यण्

**1. अधोलिखितानि पदानि विभज्य सन्धिनाम लिखत–**

1.गणेशः = ---------------------------------------------- ।

2.गङ्गोदकम् = ------------------------------------------ ।

3. शचीन्द्रः = ------------------------------------------- ।

4. वनौकसः = ------------------------------------------ ।

**2. अधोलिखितानि पदानि संयोज्य सन्धिनाम लिखत–**

1. गौरी + ईशः = -------------------------------------- ।

2. महा + उत्सवः = ------------------------------------।

3. एक + एकम् = -------------------------------------।

4. अति + उत्तमः =-------------------------------------।

**3. सन्धिं कृत्वा नाम लिखत –**

1. वधू + ऊर्मिका = ----------------------------------- ।

2. गुरु + उत्तमम् = ------------------------------------ ।

3. महा + ऊर्मिः = ------------------------------------।

4. जल + उत्पत्तिः =------------------------------------।

**4. अधोलिखितं गद्यभागं पठित्वा रिक्तस्थानं पूरयित्वा सन्धिज्ञानं प्राप्नुत –**

गणितविषये भारतस्य योगदानं **जगत्येवासदृशं** (------- + ------- +--------) वर्तते । **शून्यान्वेषणप्राज्ञाः** (------- + -------) भारतीयाः **एवेत्यङ्गीकरोति** (------ + ------ +---------) विश्वमिदं सर्वदा । भारतीयगणितपरम्परा अतीवविशिष्टा प्राचीना **चास्ति** (----- + -----) । वेदेषु तत्कालिकेषु अन्यग्रन्थेषु च गणितीयांशानाम् **उल्लेखः** (----- + -----) विशेषतः दृश्यते । जनैः बहूनां गणितीयविषयाणां ज्ञानं **भारतादेव** (----- + --------= -------

–) प्राप्तमिति विज्ञायते आर्यभट – भास्कर – वराहमिहिरादयः गणितज्ञाः सुप्रसिद्धाः एव । आधुनिकेषु गणितज्ञेषु श्रीश्रीश्री भारतीकृष्णतीर्थस्वामिमहाभागः वेदगणितस्य साक्षात्कर्ता विराजते। धार्मिकविषयाः **सर्वेऽपि** (----- + ------ =------------) वैज्ञानिकाः **इति + अंशः** (---------- = ---------- ) **वेदेषु + अन्तर्गतः** (----------= --------- ) इति । **ऐदंप्राथम्येन+अकथयत्** (-----------= ---------------- ) स्वामिमहाभागः ।

**5. संयोज्य उत्तरं लिखत–**

| | अ | आ | उत्तराणि |
|---|---|---|---|
| 1 | भगवच्छशक्तिः | जश्त्वसन्धिः | |
| 2 | बृहच्चित्रम् | श्चुत्वसन्धिः | |
| 3 | कम्पते | अनुनासिकसन्धिः | |
| 4 | अलं करोति | अनुस्वारसन्धिः | |
| 5 | वाङ्मयम् | ष्टुत्वसन्धिः | |
| 6 | तावदनन्तरम् | जश्त्वसन्धिः | |

***********

**<u>अभ्यासपत्रिका–2–</u> विस्मृतभेदाः सन्तः, अलङ्कारः, प्रबन्धः ।**

**सूक्तोत्तरचयनप्रश्नाः–**

1. अस्याः कवितायाः रचयिता एषः महाभागः ।

A. नारायण पण्डितः B. वि॥ जि. महाबलेश्वर भट्टः

C. विष्णुशर्मा D. वि ॥ जनार्दन हेगडे

2. मनसि एवं भवतु ।

A. निर्मलभावः B. अहङ्कारः C. मत्सरः D. द्वेषभावः

3. पूर्वजानां मुनीनां कवीनां च अभिप्रायः अस्ति ।

A. सर्वे भवन्तु धनिनः B. सर्वे भवन्तु सुखिनः

C. सर्वे भवन्तु रोगिणः D. सर्वे भवन्तु मुनयः

4. एतेषां कृते साहाय्यं करोतु ।

A. ज्येष्ठानां B. विद्यार्थीनां C. कृषिकाणां D. दीनानां

5. अत्र समूहेतरपदं भवति ।

A. गङ्गा B. तुङ्गा C. हिमालयः D. कावेरी

6. शब्दार्थसहितौ अस्ति ।

A. गद्यम् B. काव्यम् C. पद्यम् D.चम्पू

7. एषः अलङ्कारिकः अस्ति ।

A. मम्मटः B. भासः C. बाणः D. पिङ्गलाचार्यः

8. काव्यस्य आत्मा भवति ।

A. अक्षराणि B. शब्दार्थौ C. रसः D. कविः

9. एते काव्यशोभवर्धकाः भवन्ति ।

A. समासः B. सन्धिः C. छन्दः D. अलङ्काराः

10. एकस्यैव व्यञ्जनस्य अनेकावृत्तिः भवति ।

A. उपमा B. अनुप्रासः C. रूपकम् D.यमकः

**2) रिक्तस्थानं पूरयत ।**

1. सुखिनस्सर्वे सन्त्विति गानं तेषां ------------------
2. सुवर्णपुष्पां ---------------- ऋष्टुम् आयान्तु ।
3. अनिलः सलिलम् अनलः सर्वं सर्वेषाम् ----------------

**3) लिङ्गविभक्तिवचनानि लिखत –**

1. वाञ्छा= ---------------------------------------
2. सुखिनः= ---------------------------------------
3. तेषाम् = --------------------------------------- ।

***********

## प्रश्नपत्रिका–

**Max. Marks : 10**

**1. सूक्त–उत्तरं चित्वा लिखत –** (4)

1. नद्याः महापूरणे एतस्य कुटुम्बः हाहाकारं कुर्वन् असीत् ।

A. ब्राह्मणस्य B. महाराजस्य C. नाविकस्य D. विक्रमस्य

2. एषः ब्राह्मणस्य कुटुम्बं प्रवाहात् रक्षितवान् ।

A. नाविकः B. विक्रमः C. ब्रह्मराक्षसः D. देवः

3. अत्र समूहेतेरपदं भवति ।

A. गङ्गा B. तुङ्गा C. हिमालयः D. कावेरी

4. एते काव्यशोभवर्धकाः भवन्ति ।

A. समासः B. सन्धिः C. छन्दः D. अलङ्काराः

**2. संस्कृतभाषया उत्तरं लिखत –** (3)

1. कः राज्ञः समीपमाजगाम ?

--------------------------------------------------------------

--------------------------------------------------------------

2. सर्वेषाम् ऐक्यं केषां वाञ्छा भवति ?

3. किमर्थं हस्तः प्रसरणीयः ?

3. अलङ्कारं विवृणुत । (3)

**श्रीरामः सागर इव गम्भीरः ।**

**************